International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 169-170
© 2025 IJMH
www.themultijournal.com
Received: 15-10-2025
Accepted: 27-10-2025
Publish : 28-10-2025

**नलिनाक्ष पण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, 517507.

**Correspondence:**
**नलिनाक्ष पण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, 517507.

# आचार्यसम्पदानन्दमिश्रसम्पादितस्य “भवानी भारती”- ग्रन्थस्य स्वरूपम्

**नलिनाक्ष पण्डा**

**DOI:** https://doi.org/10.5281/zenodo.20679484

## ❖ प्रस्तावना –

**"भवानी भारती" नामसार्थक्यम्-**

भूमिः स्त्रीरूपा वेदशास्त्रपुराणेषु वर्णिता। भारतभूमिरपि इष्टदैवरूपेण देशभक्तैः आराध्यते। भरणे रतः भरतः भरतस्येयं भारती। महाभारते चन्द्रवंशे दुष्यन्तपुत्रः भरतः प्रसिद्धः। तस्य प्रथमं नाम सर्वदमनः। तं भूभरण समर्थ निश्चित्य महर्षि काश्यपः तं भरतः इति व्याजहार इति कालिदासेन वर्णितम्। यथा –

रथेनानुत्खातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्याख्यां भरत इति लोकस्य भरणात्॥[1]

भरतस्य वंशे जाताः भरताः, भरतानामियं(भूमिः) भारती।

भवानीशब्दः आदिशक्तिसूचकः यद्यपि **'भवस्य पत्नी'** इति तस्य योगिकोऽर्थः तथापि दुष्टानां हन्त्री भवानी। कालीनाम्ना सा दुष्टसंहारिणी इति प्रसिद्धा। काली, भवानी, चण्डी, अन्नपूर्णा इत्यादयः सर्वे शब्दाः तस्याः एव वाचकाः गुणनिरूपकाश्च। देशभक्तिः शक्तिसामर्थ्यसम्पादनार्थम् अयुक्ता भावरूपा शक्तिमती भवति। किन्तु एका देशभक्तिः न कार्यसाधिका यदि सा शक्त्या युक्ता सा अविनाशिनी भवति। प्रायशः परतन्त्रे देशे देशभक्ताः स्वातन्त्र्यसिद्धये शक्तिसम्पादनाय कृतनिश्चयाः। तदर्थ भरतभूमिं ते भवान्याः अभिन्नां मत्वा तया प्रसादित वलाः अभूवन्। एवंविधमालोचनं काव्ये सर्वत्र दृष्टमिति **"भवानी भारती"** इति सार्थकं नाम।

## ❖ भवानीभारतीकाव्यस्य कर्ता, कालश्च –

अरविन्दयोगिनः इयमेका एव संस्कृतिकृतिः उपलब्धा प्रायशः १९०४-१९०८ मध्यकाले रचिता स्यात् इति सम्पादकस्य अभिप्रायः दुर्दैववशात् कलकत्ता रक्षकभटैः बलात् गृहीता बहुतिथः कालः प्रच्छन्ना अभूत्। १९८५ वत्सरे अरविन्दाश्रमवासिनः इमां कृतिं प्राप्य प्रकाशितवन्तः। अरविन्दाश्रमेनैव काव्यस्यास्य "भवानीभारती" इति नामकरणपि कृतम्।

## ❖ सम्पादकस्य परिचयः –

आचार्यसम्पदानन्दमिश्रः संस्कृतभाषायाः जिज्ञासुः संस्कृताध्ययने आर्तिसंयुक्तश्च। संस्कृतभाषा मनुष्याणाम् ओजः तेजोऽभिवर्धिका, पवित्र-आध्यात्मिकोन्नतीनां प्रापणे च समर्था इति तस्य विश्वासः। अनेकासु गोष्ठीषु साहित्यधार्मिकमहोत्सवेषु देशीय, अन्तर्जातीयवेदिकासु भारतीयसंस्कृतिं योगविद्यामधिकृत्य प्रचारं कृतवान्। अपरो महान् विशेषः अयं अरविन्दयोगिनः मातुश्च आराधकः। तयोः प्रसिद्धरचनाभिः प्रभावितः अरविन्दप्रोक्त योगमार्गमधिकृत्य बहून् वेदान्तसम्बन्धिनः उपन्यासान् अनेकासु वेदिकासु दत्तवान्।

आचार्यसम्पदानन्दमिश्रमहोदयः स्वयं कविः बहूनां ग्रन्थानां सम्पादकः, सहस्राधिकानां गोष्ठीपत्राणां समर्पकः बहूनां गोष्ठीनां स्वयं निर्वाहकः च वर्तते। विदेशेष्वपि बहुषु वेदिकासु अरविन्दयोगिनः आध्यात्मिकविद्यायाः, भारतीयसंस्कृतेः, संस्कृतभाषायाश्च प्रचारको वर्तते। एवंविधस्य आधुनिकसंस्कृतभाषाभिवृद्धये योगदातुः आचार्यसम्पदानन्दमिश्रमहोदयस्य परिचयः आंग्लभाषायां प्रकाशितः च संस्कृतभाषायामत्र उदाह्रियते।

## ❖ विषयोपस्थापनम्

**"भवानीभारती" काव्यस्वरूपम् –**

उपलब्धे काव्ये एकोनशतं श्रोकाः वर्तन्ते। काव्यमिद ग्रन्थान्ते आशीः रूपमङ्गलदर्शनेन सम्पूर्णं प्रतिभाति।

सिन्धून् हिमाद्रिश्च ससौम्यभासा

प्रकाशयन्ती सुदृढप्रतिष्ठा।
तिष्ठ प्रसन्ना चिरमार्यभूमौ
महाप्रतापे जगतो हिताय॥[2]

भारतीं महाप्रतापे इति सम्बोध्य चिरं प्रसन्ना तिष्ठ इति प्रार्थनया भारतीयेभ्यः हिताशंसादृष्टा इति आशिषा काव्यं मङ्गलान्तं समाप्तम्। स्यादाशीः तु - हिताशंसा .... इत्यमरः।

**"भवानी भारती" काव्यपरिचयः-**

एकोनशतश्रोकेषु सर्वत्र एकादशं त्रिष्टुप् छन्दः एव प्रयुक्तम्। त्रयो वृत्तभेदाः तस्मिन्नेव छन्दसि प्रयुक्ताः, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिश्च इति। कविता विविक्ते स्थितस्य शयानस्य वा भाव प्रवाहः इति विलियं वोड्सवर्त इति अभिप्रैति। भावकवितायाम् आत्माश्रयः वस्त्वाश्रयः चेति द्वैविध्यं भवति। अत्र कविता आत्माश्रया कदाचित् कवि: (अरविन्दः) शय्यायां किमपि चिन्तयन् शयितः।

तदानीं ललितं गीतं तेन वेदमन्त्रः इव स्मृतः आसीत्, महान् ध्वनिः तदैव आविर्भूतः। अत्रान्तरे दुःखकाले नैवं सुखचिन्ता करणीया इति बोधयन्तीव वक्षसि मां स्पृष्टा काली प्रत्यक्षीभूय मामेव वदति इति कविरात्मवृत्तमिव वर्णयति।

सुखं मृदावास्तरणे शयानं
सुखानि भोगान् वसु चिन्तयन्तम्।
पस्पर्श भीमेन करेण वक्षः
प्रत्यक्षषमक्ष्णोश्च बभूव काली॥[3]

ततः चतुर्भिः श्रोकैः तस्याः भीकरं रूपमुपवर्णितम्। ततः काली "उत्तिष्ठ(देशाय) देयं देहि" इति आदिदेश। कविरपि कर्त्तव्यं ब्रूहि इति तां प्रार्थयामास। सा एवमुवाच - ते अहं माता सर्वेषां भारतीयानां च मातैव अस्मि। भारतीया: देवेषु कृतविश्वासाः तान् नाशयितुं कालः यमोऽपि वा न समर्थः। भारतीयाः पूजनीयाः ब्रह्मचर्यैः विशुद्धपराक्रमैः सहस्रसूर्यसदृशाः। शूराः शत्रून् योधयित्वा रणे क्षतदेहाः पतिताः दुर्जनाः गृहेषु भीताः दीनाः, क्लीबाश्च वर्तन्ते। एवं विधान् दृष्ट्रा विपक्षाः हसन्ति। त्वं विष्णुतेजोऽसि ते वक्षसि एव अग्निः स्थितः तेनैव शत्रून् दग्ध्वा स्वैरं विहरस्व। एवम् एकविंशतिश्लोकैः(१२-३२) कालिकायाः प्रबोध: उपवर्णितः। कविरपि कालिकायाः उपदेशं श्रुत्वा सपदि युद्धार्थं निर्गतः सर्वं देशं भ्रमन् शत्रून् हतवान्। भीमा काली अपि वीरविहारं कुर्वती तत्सहायिका अभूत्। शत्रून् अपि सा विद्रावयन्ती भीकरैः वाक्यैः तर्जयामास।

सुप्तेषु पुत्रेषु रणोत्सुकेषु
निशाचरः शोणितमार्यमातुः।
पिबन् विनर्दस्यबलान् बली को
विहंसि चाण्डाल कृतान्तभक्ष्य।।
इतीरयन्ती वचनानि रुष्टा
शस्त्रं गृहीत्वा धनुरग्निगर्भम्।
अभ्यद्रवद् भीममरातिमुग्रा
पश्चात् पुरस्ताच्च जगर्ज काली॥[4]

ततः कविरपि प्रभाते सूर्यं दृष्टवान्। शत्रुविध्वंसिनी कालीं स्तुतवान्। तस्याः स्वरूपवर्णने देशेस्थितानां यमुना प्रभृतीनां वर्णनमपि दृष्टम्। तस्याः शिवेन अभेदोऽपि वर्णितः। यथा-

सनातनी देवि शिवस्य पूर्वं
वपुस्त्विदं धारयसे युवत्याः।
तुभ्यं नमस्तुभ्यमनादिमातः
सौम्या भवाम्ब प्रणतेषु भीमे॥[5]

कालिकायाः सौम्यं रूपम्, उग्रं रूपं च बहुधा वर्णितम्।

नरास्थिमाला नृकपालकाञ्ची
क्क सा कराली क्षुधिता च काली।
नग्ना च घोरा विवृतास्यभीमा
यस्या विरावैः सहसोत्थितोऽस्मि॥
अनन्तशक्त्यृद्धिमशेषमूर्तिं
को वक्ष्यतीमां तव सर्वशक्ते।
तेजस्त्वमेतद्बलिनां बलञ्च
त्वं कोमलानामपि कोमलासि॥[6]

एवं काली सर्वान् आर्षधर्मविरोधिनः हत्वा प्राचीनं वैदिकधर्मं स्थापितवती इति नवभि: (९१-९९) श्लोकैः वर्णितम्। आर्षधर्मोद्ध-रणमेव कवे: मुख्याभिप्रायः इति काव्ये स्पष्टम्।

सनातनान् रक्षति धर्ममार्गान्
पुनः सहस्रांशुकुलार्यजन्मा।
लक्ष्मीः पुनः साप्यचला स्मितास्या
समुज्वला राजति भारतेषु॥[7]

**उपसंहारः –**

देशभक्तप्रवोधकग्रन्थः भवति "भवानी भारती" । ग्रन्थेऽस्मिन् एकोनशतश्लोकाः विद्यन्ते। एतेषु श्लोकेषु सर्वत्र एकादशाक्षराणां त्रिष्टुप्-छन्दसः प्रयोगः दृश्यते। त्रयो वृत्तभेदाः तम्सिन्नेव छन्दसि प्रयुक्ताः वर्त्तन्ते। यथा –

1. इन्द्रवज्रा
2. उपेन्द्रवज्रा
3. उपजातिश्चेति

देशभक्तिप्रवोधनं स्वातन्त्र्येच्छा यद्यपि प्राचीनसाहित्येऽपि वर्णिता तथापि एवं विधायाः प्रत्येकशाखायाः 1900 प्रारम्भे एव अभुत्। देशभक्तिप्रवोधकाः कविताः प्रायशः सर्वासु भारतीयभाषासु आविर्भुताः। संस्कृतभाषायां तादृशं काव्यं "काव्यं भारती" इति अरविन्देन कृतम् आचार्यसम्पदामिश्रेण च सम्पादितम्।

**सहायकग्रन्थसूची –**


1. विक्रमोर्वशीयम् – महाकविकालिदासः, साहित्य अकादेमी, दिल्ली– 2014.
2. अभिज्ञानशाकुन्तलम् – महाकविकालिदासः– राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः – 1999.
3. भवानी भारती – आचार्यसम्पदामिश्रः– Auro Public-ation, Sri Aurobindo Society, Puducherry – 2014
4. अमरकोशः – अमरसिंहः – चौखम्बा संस्कृतविद्या-लयः,वाराणसी – 2012.
5. संस्कृतसाहित्येतिहासः – आचार्यहंसराजः अग्रवालः, चौखम्बा-सुरभारतीप्रकाशनम्, वाराणसी – 1986


**पाद टिप्पणी**

1. अभि. शा. – 7/33 श्लोकः, पृ.-178
2. भ. भा. - 99 श्लोकः, पृ.-99
3. भ. भा- 4 श्लोकः, पृ.-4
4. भ. भा.-43,44 श्लोकः, पृ.-43,44
5. भ. भा. -81 श्लोकः, पृ.-81
6. भ. भा.- 85,88 श्लोकः, पृ.-85,88
7. भ. भा. - 94 श्लोकः, पृ.-94